घर्म्मनिस्रावणे तत्प्रकारादिकं चरकेणाभिहितं यथा
"अतः स्वेदाः प्रवक्ष्यन्ते यैर्यथावत् प्रयोजिताः । स्वेद-
साध्याः प्रशाम्यन्ति गदा वातकफात्मकाः । स्नेहपूर्व्वं
प्रयुक्तेन स्वेदेनावर्जितेऽनिले । पुरीषमूत्ररेतांसि न
सज्जन्ति कथञ्चन । शुष्काण्यपि हि काष्ठानि स्नेह-
स्वेदोपपादनैः । नमयन्ति यथान्यायं किं पुनर्जीवतो
नरान् । रोगर्त्तुव्याधितापेक्षो नात्युष्णोऽतिमृदुर्न च ।
द्रव्यवान् कल्पितो देशे स्वेदः कार्य्यकरो मतः । व्याधौ
शीते शरीरे च महान् स्वेदो महाबले । दुर्ब्बले दुर्ब्बलः
स्वेदो मध्यमे मध्यमो हितः । वातश्लेष्मणि वाते वा
कफे वा स्वेद इष्यते । स्निग्धरूक्षस्तथा स्निग्धो रूक्षश्चा-
प्युपकल्पितः । आमाशयगते वाते कफे पक्वाशयाश्रिते ।
रूक्षपूर्व्वो हितः स्वेदः स्नेहपूर्व्वस्तथैव च । वृषणौ
हृदयं दृष्टी स्वेदयेन्मृदुनैव वा । मध्यमं वङ्क्षणौ
शेषमङ्गावयवमिष्टतः । सुशुद्धैर्नक्तकैः पिण्ड्या गोधूमाना-
मथापि वा । पद्मोत्पलपलाशैर्वा स्वेद्यः संवृत्य चक्षुषी ।
मुक्तावलीभिः शीताभिः शीतलैर्भाजनैरपि । जलार्द्रै-
र्जलजैर्हस्तैः स्विद्यतो हृदयं स्पृशेत् । शीतशूलव्युप-
रमे स्तम्भगौरवनिग्रहे । सञ्जाते मार्द्दवे स्वेदे स्वेदनाद्
विरतिर्म्मता । पित्तप्रकोपो मूर्च्छा च शरीरसदनं तृषा ।
दाहः स्वेदाङ्गदौर्ब्बल्यमतिस्निग्धस्य लक्षणम् । उक्त-
स्तस्याश्रितीये यो ग्रैष्मिकः सर्व्वशो विधिः । सोऽति-
स्विन्नस्य कर्त्तव्यो मधुरः स्निग्धशीतलः । कषायमद्य-
नित्यानां गर्भिण्या रक्तपित्तिनाम् । पित्तिनां साति-
साराणां रूक्षाणां मधुमेहिनाम् । विदग्धभ्रष्टब्रध्नानां
विषमद्यविकारिणाम् । श्रान्तानां नष्टसंज्ञानां स्थूलानां
पित्तमेहिनाम् । तृष्यतां क्षुधितानाञ्च क्रुद्धानां शोच-
तामपि । कामल्युदरिणाञ्चैव क्षतानामाढ्यरोगिणाम् ।
दुर्ब्बलातिविशुष्काणामुपक्षीणौजसां तथा । भिषक् तै-
मिरिकाणाञ्च न स्वेदमवतारयेत् । प्रतिश्याये च कासे
च हिक्काश्वासेष्वलाघवे । कर्णमन्याशिरःशूले स्वरभेदे
गलग्रहे । अर्द्दितैकाङ्गसर्व्वाङ्गपक्षाघाते विनामके । को-
ष्ठानाहविबन्धेषु शुक्राघाते विजृम्भके । पार्श्वपृष्ठकटी-
कुक्षिसंग्रहे गृध्रसीषु च । मूत्रकृच्छ्रे महत्त्वे च मुष्क-
योरङ्गमर्द्दके । पादोरुजानुजङ्घार्त्तिसंग्रहे श्वयथावपि ।
खल्लीष्वामेषु शीते च वेपथौ वातकण्टके । सङ्कोचायाम
शूलेषु स्तम्भगौरवसुप्तिषु । सर्व्वाङ्गेषु विकारेषु स्वेदनं
हितमुच्यते । तिलमाषकुलत्थाम्लघृततैलामिषौदनैः ।
पायसैः कृशरैर्मांसैः पिण्डस्वेदं प्रयोजयेत् । गोखरोष्ट्र-
वराहाश्वशकृद्भिः सतुषैर्यवैः । सिकतापांशुपाषाणकरी-
षायसपूटकैः । श्लैष्मिकान् स्वेदयेत् पूर्व्वैर्वातिकान् समु-
पाचरेत् । द्रव्याण्येतानि शस्यन्ते यथास्वं प्रस्तरेष्वपि ।
भूगृहेषु च जेन्ताकेषूष्णगर्भगृहेषु च । विधूमाङ्गारतप्ते-
ष्वभ्यक्तः स्विद्यति ना सुखम् । ग्राम्यानूपौदकं मांसं
पयोवस्तशिरस्तथा । वराहमध्यपित्तासृक्स्नेहवत्तिल-
तण्डुलान् । इत्येतानि समुत्क्वाथ्य नाडीस्वेदं प्रयो-
जयेत् । देशकालविभागज्ञो युक्त्यपेक्षो भिषक्तमः ।
वारुणामृतकैरण्डशिग्रुमूलकसर्षपैः । वासावंशकरञ्जार्क-
पत्रैरश्मन्तकस्य च । शोभाञ्जनकशैरीयमालतीसुरसा-
र्जकैः । पत्रैरुत्क्वाथ्य सलिलं नाडीस्वेदं प्रयोजयेत् ।
भूतीकपञ्चमूलाभ्यां सुरया दधिमस्तुना । पत्रैरम्लैश्च
सस्नेहैर्नाडीस्वेदं प्रयोजयेत् । अतएव च निर्य्यूहाः
प्रयोज्या जालकोष्ठके । स्वेदनार्थं घृतक्षीरतैलकोष्ठांश्च
कारयेत् । गोधूमशकलैश्चूर्णैर्यवानामम्लसंयुतैः । सस्नेह-
किण्वलवणैरुपनाहः प्रशस्यते । गन्धैः सुरायाः किट्टेन
जीवन्त्या शतपुष्पया । उमया कुष्ठतैलाभ्यां युक्तया
चोपनाहयेत् । चर्म्मभिश्चोपनद्धव्यः सलोमभिरपूतिभिः ।
उष्णवीर्य्यैरलाभे तु कौशेयाविकशाटकैः । रात्रौ बद्धं
दिवा मुञ्चेत् मुञ्चेद्रात्रौ दिवाकृतम् । विदाहपरिहारार्थं
स्यात् प्रकर्षस्तु शीतले । सङ्करः१ प्रस्तरो२ नाडी३ परि-
षेको४ऽवगाहनम्५ । जेन्ताको६ऽश्मघनः७ कर्षूः८ कु-
टी९भूः१० कुम्भिकैव११ च । कूपो२१ होलाक१२ इत्येते
स्वेदयन्ति त्रयोदश । तान् यथावत् प्रवक्ष्यामि सर्व्वा-
नेवानुपूर्व्वशः" इति । तत्र वस्त्रान्तरितैरवस्त्रान्त-
रितैर्वा पिण्डैर्यथोक्तैरुपस्वेदनं सङ्करस्वेद१इति वि-
द्यात् । शूकशमीधान्यपुलाकानां वेशवारपायसकृशरोत्-
कारिकादीनां वा प्रस्तरे कौशेयाविकोत्तरप्रच्छदे पञ्चा-
ङ्गुलोरुबूकार्कपत्रप्रच्छदे वा स्वभ्यक्तसर्व्वगात्रस्य शया-
नस्योपरि स्वेदनं प्रस्तरस्वेद२इति विद्यात् । स्वेद-
नद्रव्याणां पुनर्मूलफलपत्रभङ्गादीनां मृगशकुनपिशित-
शिरस्पदादीनामुष्णस्वभावानां वा यथार्हमम्ललवण-
स्नेहोपसंहितानां मूत्रक्षीरादीनां वा कुम्भ्यां वाष्पम-
नुद्वमन्त्यामुत्क्वथितानां नाड्या शरेषीकावंशदलकरञ्जार्क-
पत्रान्यतमकृतया गजाग्रहस्तसंस्थानया व्यामदीर्घया
व्यामार्द्धदीर्घया वा व्यामचतुर्भागाष्टभागमूलाग्रपरिणाह-
स्रोतसा सर्व्वतो वातहरपत्रसंवृतच्छिद्रया द्विस्त्रिर्वा विना-